श्रीवैष्णवसौभाग्ये

# श्रीवरवरमुनि वारमाला

## ஸ்ரீவரவரமுநி வாரமாலா.

सौम्यजामातृयोगीन्द्रसद्गुणस्तोमभूषिताम् ।
वारमालामिमां वच्मि सात्त्वा हृदि बिभ्रतु ॥

---

आदित्योऽयं भुव्यवतीर्णः किमिहेति
प्राज्ञैस्सर्वैरुल्लिखितो यो विरराज ।
सोऽयं श्रीमत्सुन्दरयोगी गुरुवर्यः
तेजः किञ्चिद्दासजनेऽस्मिन्निदधातु ॥ १ ॥

सोमो भूमौ रम्यमुनीन्द्रः किमु जज्ञे ?
नैवैतस्मिन्नस्ति कलङ्कस्थितिवार्ता ।
नापि ह्रासो नैव च दोषाकरभावो
नो दुर्दैवाश्लेषकथा तत्कथमिन्दुः ॥ २ ॥

पूर्वे सर्वे देशिकवर्याः शुभचर्याः
यन्मूर्त्याऽत्र प्रादुरभूवन् समवेताः ।
तेनैतेन श्रीवरयोगिप्रवरेण
श्रीमान् रङ्गी मङ्गलवारान्निधिरासीत् ॥ २ ॥

सर्वस्वामी सौम्यवराख्यो मुनिवर्यः
स्वीयश्रीपादाम्बुजतीर्थं सुपवित्रम् ।
अस्मत्पूर्वाचार्यवराय प्रदिशन् सन्
दिव्यज्ञानं तस्य समृद्धं तनुतेस्म ॥ ४ ॥

भूयांसोऽस्यां बिभ्रति भूमौ गुरुशब्दं
प्रायो रूढिस्तत्र भवेदित्यवधार्यम् ।
योगार्थस्य प्रेक्षणमस्मिन् सुशकं स्यात्
एकस्मिन् श्रीसुन्दरजामातृमुनीन्द्रे ॥ ५ ॥

काव्यालङ्कारादि पठित्वा कवितायां
वैचक्षण्यं ये दधुरेते निजवाणीम् ।
योगीन्द्रेऽस्मिन् रम्यवरे चेद्विनियुक्तां
कुर्युः श्रेयः प्राप्तुमनन्तं प्रभवेयुः ॥ ६ ॥

भूयिष्ठोक्त्या किन्तु फलं स्यात् शृणुतैतत्
जन्मन्यस्मिन् यस्तु सकृद्वा हृदयं स्वम् ।
सक्तं कुर्याद्रम्यमुनीन्द्रे गुणसिन्धौ
मन्दप्रज्ञोऽप्येष मनीषिप्रवरः स्यात् ॥ ७ ॥

वरयोगिमनोरम्यां वारमालामिमां पठन् ।
वारंवारमनर्थौघान् वारयेद्भववारिधौ ॥